**दिनाङ्क :-13.11.2024** **प्रातः - 06:55**

**प्रधानमंत्री-बिहार**

प्रधानमन्त्री नरेन्द्रमोदी अद्य बिहारस्य दरभंगायां प्रायः एकशतोत्तर द्वादशसहस्र कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं, आधारशिलास्थापनं, राष्ट्राय समर्पणं च करिष्यति। क्षेत्रे स्वास्थ्यसंरचनां प्रवर्धयितुं प्रधानमन्त्री षष्ट्योत्तर द्वादशशत कोटिरूप्यकाणां मूल्यात्मकस्य दरभङ्गा एम्स् चिकित्सालयस्य आधारशिलां स्थापयिष्यति। अस्मिन् विशिष्ट-चिकित्सालये आयुष-खण्डः, चिकित्सा-महाविद्यालयः, नर्सिंग्-महाविद्यालयः, रात्रि-आश्रयः, अन्येषां च आवासीय-सुविधानां समावेशो भविष्यति। श्रीमोदी बिहारे प्रायः सप्तत्योत्तर पञ्चसहस्र कोटिरूप्यकाणाम् राष्ट्रियराजमार्गपरियोजनानां उद्घाटनं, आधारशिलां च स्थापयिष्यति।

झारखण्ड-निर्वाचनम्

झारखण्डीय-विधानसभा-निर्वाचनाय प्रथमचरणात्मिका सन्नद्धता सञ्जाताऽस्ति। अद्य चरणेऽस्मिन् त्रिचत्वारिंशत् आसनेभ्य: मतदानं भविष्यति। मतदानं सप्तवादनादारभ्य सायं पञ्चवादनं यावत् प्रचालिष्यति। द्वितीयचरणस्य मतदानं अस्यैव मासस्य विंशति-तारिकायां अष्टत्रिंशत् आसनेभ्य:भविष्यति। मतगणना च नवम्बर-मासस्य त्रयोविंशे दिनाङ्के भविष्यति। झारखण्डप्रदेशस्य मुख्यनिर्वाचनाधिकारिणा श्री के.-रविकुमारेण प्रोक्तं यत् विधानसभा-निर्वाचनस्य घोषणानन्तरं राज्यस्य विभिन्नेभ्य: भागेभ्य: नवसप्तत्युत्तरैक-शतकोटितोपधिक-रुप्यकात्मकमूल्यानाम् अवैधानिक-सामग्र्य: धनानि च निग्रहितानि सन्ति। तावन् एन.डी.ए. इत्याख्य: राष्ट्रिय-लोकतान्त्रिक-संघ: आई.एन.डी. आई.ए. इति च दलसमूह: सम्प्रति तत्र स्वकीयं ध्यानं केन्द्रीकुरुत: स्त: यत्र द्वितीयचरणीय मतदानं सम्भावितमस्ति।

प्रधानमन्त्री-चन्द्रपुर रैली

महाराष्ट्रविधानसभाया: नैर्वाचनिक प्रचारोपक्रम: अपि उत्तुंगतां भजते। विभिन्नानां राजनीतिकदलानां वरिष्ठा: नेतार: मतदातृन् समाक्रष्टुं सर्वविधयत्ने रता: सन्ति। भाजपेतिदलस्य वरिष्ठ नेता प्रधानमन्त्री च नरेन्द्रमोदी ह्य: महाराष्ट्रस्य तीव्रविकासाय महायुति-प्रशासनस्य प्रशंसां कृतवान्। चन्द्रपुर जनपदस्य चिमूर इति क्षेत्रे एकां नैर्वाचनिकजनसभां सम्बोधयता श्रीमोदिना भणितं यत् अयं महायुतिप्रशासनस्य सत्प्रयासानां परिणाम: अस्ति यत् गतद्वाभ्यां वर्षाभ्यां महाराष्ट्रप्रदेश: सर्वाधिकतया प्रत्यक्ष-विदेश-धन-निवेशे सक्षमतम: अभवत्। श्रीमोदिना भाजपेति दलस्य घोषणापत्रस्य प्रशंसाकुर्वता उक्तं यत् ए.आई. विश्व-विद्यालय:, जलग्रिड इति परियोजना:, आवासयोजना:, नलिका-जल-सम्पर्कजाल:, आद्य: महत्वाधायिन्य: घोषणा: महाराष्ट्रस्य उज्ज्वलभविष्याय लाभकारिण्य: सन्तीति।

DRDO परीक्षणम्

DRDO इति रक्षा अनुसन्धानविकाससङ्गठनेन ह्यः ओडिशा-तटस्य समीपस्थे चण्दीपुर-नगरस्य एकीकृतपरीक्षणकेन्द्रात् व्यापकदूरीपर्यन्तं भू-आक्रमण-क्रूज- प्रक्षेपास्त्रस्य प्रथम-उड्डयन-परीक्षणं मोबाईल-आर्टिक्युलेटेड-लांचर-इत्यनेन यानेन कृतम्। परीक्षणस्य समये सर्वाणि उपतन्त्राणि अपेक्षानुसारं कार्याणि कृतवन्तः, प्राथमिकअभियानस्य उद्देश्यं च पूर्णं जातम्। रक्षामन्त्री राजनाथसिंहः सफलप्रथमविमानपरीक्षणे सम्मिलितानां डीआरडीओ, सशस्त्रसेना, उद्योगानां च प्रशंसाम् अकरोत्। सः अवदत् यत् एतेन भविष्ये स्वदेशीय-क्रूज-क्षेपणास्त्र-विकासकार्यक्रमानाम् मार्गः प्रशस्तः भवति।

हॉकी

हॉकी-क्रीडायां भारतेन दक्षिणकोरिया-विरुद्धं द्वन्द्वं त्रीणि-द्वे इत्यंकान्तरालेन विजितम्। चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य महिला-एशिया-चैम्पियन्स्-ट्राफी-क्रीडायाम् अद्य बिहारस्य राजगीरे भारतं थाईलैण्ड दलं सम्मुखी करिष्यति।

क्रिकेट

भारत दक्षिण-अफ्रीका-देशयोः मध्ये विंशतिः प्रति विंशतिः क्रिकेट्-क्रीडा स्पर्धायाः तृतीयं द्वन्द्वं अद्य सुपरस्पोर्ट पार्क सेन्चुरियन-नगरे क्रीडिष्यते। स्पर्धाया: प्रसारणं सायं सार्धअष्टवादने भविष्यति।

॥इति वार्ता:॥